No. ८८१ - घ

Title आदित्य हृदयम्

Author

Extent ११ Age

Subject स्तोत्रम् · अपूर्णम्

नं० ८८१-घ

आदित्यहृदयम्- ~~(अपूर्णम्)~~ (स्तोत्रम्)

नं० ८८१-घ

पत्राणि ११ (अपूर्णम्)

6

२७

ॐ श्रीगणेशाय नमः श्रीशतानीक उवाच ॐ कथ
मादित्यमुद्यंनमुपतिष्ठेद्विजोत्तम एतन्मे ब्रूहि विप्रें
द्रप्रपद्येशरणंतव सुमंतुरुवाच इदमेवपुरा: पृष्टः शं
खचक्रगदाधरः प्रणम्यशिरसादेवमर्जुनेनमहात्मना
गुडाकेशेयमंहेत्रेविगतेभारतेरणे स्थिरकामंसमागत्य
सादित्यंलोकपूजितं कृतांजलिः पुटोभूत्वापार्थोविप्रम
प्यब्रवीत् अर्जुन उवाच ज्ञातंचधर्मशास्त्राणांगुह्याद्गुह्य
तरंतथा मयाकृतस्त्वपारित्तानेवाष्र्णेयंसचराचरं सूर्यस्त्व
तिमयंन्यासंवक्तुमर्हसिमायव: भक्त्याएक्कामिदेवेश
कथयस्त्वप्रसादतः सूर्यभक्तिंकरिष्यामितत्वसारेनसाम

ग्र. १

माधवः ॥ श्रीभगवानुवाच ॥ रुद्रादिदेवतैः सर्वैः पृष्टेनक
थितं मया वक्ष्येहं कर्मणि न्यासे शृणुष्व पाण्डव यत्नतः ॥ अस्मा
के यत्त्वया पृष्टमेकचित्तो भवार्जुन तदहं संप्रवक्ष्यामि ह्या
दिमध्यावसानकं ॥ अर्जुन उवाच ॥ नारायण सुरश्रेष्ठ पृ
च्छामि त्वां महाशय ॥ कथमादित्यमुद्यन्तमुपतिष्ठेत्सनात
न ॥ श्रीभगवानुवाच ॥ साधु पार्थ महाबाहो बुद्धिमानसि पा
ण्डव ॥ यन्मां पृच्छस्युपस्थानं तत्पवित्रं विभावसोः ॥ सर्वमंग
लमांगल्यं सर्वपापप्रणाशनं ॥ सर्वरोगप्रशमनमायुर्वर्ध
नमुत्तमम् ॥ अमित्रदमनं पार्थ संग्रामे जयवर्धनं ॥ वर्धनं ध
नपुत्राणामादित्यहृदयं शृणु ॥ यत्कृत्वा सर्वपापेभ्यो मुच्य

नैनात्र संशयः विष्णुलोकेषु विख्याते निःश्रेयसकरं
परं देवदेवं नमस्कृत्य प्रातरुत्थाय चार्जुन विघ्नानेकद
पापानि नश्यंति समस्मरणादपि तस्मात्सर्वप्रयत्नेन सूर्यमारा
धयेत्सदा आदित्यहृदयं नित्यं जाप्यं तच्छृणु पाण्डव ॥ ओं
अस्य श्रीआदित्यहृदयस्तोत्रमंत्रस्य श्रीकृष्ण ऋषिः, अनु
ष्टुप्छंदः श्रीसूर्यो नारायणो देवता ॥ हरितहयरथं दि
वाकरं घृणिरिति बीजं जितवैश्वानरजातवेदसे इति शक्तिः
अंशुमानिति कीलकं अग्निगर्भ इति मंत्रः आत्मनः सर्व
रोगनिवारणार्थं सकलफलप्राप्त्यर्थं आदित्यहृदयपा
ठे विनियोगः ओं अर्कं तु मूर्ध्नि विन्यस्य ललाटे तु रविं न्यसेत्

प्र. स.
१
2

यं

विन्यसेन्नेत्रयोः सत्रं कर्णयोस्तु दिवाकरं नासिकायां न्य
सेद्भानुं मुखे वै भास्करं न्यसेत् पर्जन्नामोष्ठयोश्चैव तीक्ष्णं
जिह्वांतरे न्यसेत् सुवर्णरेतसं कंठे स्कंधयोस्तिग्मतेजसं
बाह्वोस्तु पूष्णं चैव मित्रं वै पृष्ठतो न्यसेत् वरुणं दक्षिणे
हस्ते त्वष्टारं वामतः करे हस्तावुष्णकरः पातु हृदयं पातु भा
नुमान् उदरे तु यमं विद्यादादित्यं नाभिमंडले कट्यां तु
विन्यसेद्धंसं रुद्रमूर्वोस्तु विन्यसेत् जान्वोस्तु गोपतिं न्यस
सवितारं जंघयोः पादयोस्तु विवस्वंतं गुल्फयोश्च प्रभा
करं बाह्यतस्तु तमोध्वंसं भगमभ्यंतरे न्यसेत् सर्वांगेषु सह
स्रांशुं दिग्विदिक्षु विन्यसेत् एष आदित्यविन्यासो देवानाम १

पितृर्लभः यइमं विन्यसेत्पार्थ स याति परमां गतिं कामक्रोध
कृतात्पापान्मुच्यते नात्र संशयः सर्पादपि भयं नैव संग्रामेषु
पथिष्वपि रिपुसंकटकालेषु तथा चौरसमागमे त्रिसंध्यं
वैजपेत्पार्थ महापातकनाशनं विस्फोटकसमुत्पन्नं तीव्रज्वर
समुद्भवं शिरोरोगं नेत्ररोगं सर्वव्याधिविनाशयेत् कुष्ठव्याधी
स्तथा दद्रुरोगांश्च विविधांस्तथा भृगुगतलस्य शमयेभनया
भृगुगतदर्शनेन आदित्यं मंत्रसंयुक्तं आदित्यं परमेश्वरं आदित्यं
परमं देवमादित्यं परमं पदं आदित्यमर्चयेद्ब्रह्मा आदित्यम
र्चयेच्छिवः यदादित्यगतं तेजो मम तेजस्तदर्शनेन त्रिसंध्यम
र्चयेत्तत्र यः स्मरेद्भक्त्या स तु यो नरः न पश्येत्स तदारिद्र्यं जन्मजन्मा

आ॰ नित्यार्जुन पठन्नेकचित्तेपार्थ स्वादित्यहृदयंमया मुच्यतेस
हृ॰ र्वपापेभ्यो: सूर्यलोकेमहीयते ॐनमोभगवतेसूर्याय ॐ
४ आदित्य: सविता सूर्य: खग: पूषा गभस्तिमान् सुवर्ण: स्फ
3 टिकोभानुस्फुरितोविश्वभावन: हिरण्यगर्भस्त्रिशिरस्तपनो
भास्करोरवि: मार्तण्डोगोपति: श्रीमान्कृतज्ञश्चप्रतापवान्
तमिस्रहाभगोहंसोभास्वांवैवतमोनुद: शुद्धोविरोचन: केशी
सहस्रांशुर्महाप्रभु: विवस्वान्पूषणोमृत्यु: मिहिरोजामदग्न्य
जित् धर्मरश्मिःपतंगश्चशरण्योमित्रहातप: दुर्विज्ञेयगति:
शूरतेजोराशिर्महायशा: अंशुमान्नमोदेव: सूर्यज: सामप ३
वच हरिदश्वस्तमोहार: सप्तसप्तिर्मरीचिमान् अग्निगर्भोदिते:

श्रुतः शंभुः क्लिक्लिरन्नाशनः सूक्ष्मो विश्वंभरो मित्रः स्वलयनः स्वप
नायवान् प्रातर्यीमित्कलीभास्वांस्तलयनः सर्वनायनः कृत्तिवा
सा महातेजाः सर्वरत्नमयोद्भवः अन्तरस्थान्तरस्थश्च प्रभाक
रविभाकरौ चंद्रश्चेंद्रोगदः सोमो हव्यकव्यपालश्च शृंगा
रको महाशृंगारो रुग्णांगश्चांगवर्धनः बुद्धो बुद्धिर्मनो बुद्धिर्बुद्धा
त्मा बुद्धिवर्धनः बृहद्ब्रह्मा बृहद्ब्रह्मा सो बृहद्ब्रह्मा बृहस्पतिः अ
क्रान्ते शुक्रकरेनाश्च शुक्लांगः शुक्लभूषणः शनिर्मा शनिरूपश्च
शनैर्गमनतत्परः अनादिरादिरूपस्त्वं स्वर्भानुर्भानुदीप्तिमान्
धूम्रकेतुर्महाकेतुः सर्वकेतुरनुत्तमः नमः सर्वाय गिरये पाशि
माय नमो नमः उग्राय च नमस्तुभ्यं दक्षिणाय नमो नमः नमः

पद्मप्रबोधायनमस्तेब्रह्मरूपात्मने नमोविश्वप्रबोधायनमोग्रा
जिष्णुजिष्णवे ज्योतिषेचनमस्तध्वांतनाशकायनमोनमः प्रग
ल्भायप्रदीप्तायपुगांनायनमोनमः नमस्तेहोतृपतयेपृथिवी
पतयेनमः नमोंकारवषट्कारसर्वयज्ञनमोस्तुते ऋग्वेदादि
यजुर्वेदसामवेदनमोस्तुते नमोहाटकवर्णायभास्करायनमो
नमः जयायजयभद्रायहरिदश्वायतेनमः दिव्यायदिव्यरूपाय
ग्रहाणांपतयेनमः नमस्तेशुचयेनित्यंसर्वाकलकलात्मने नमो
वैकल्पनाशायनमस्तेहिरण्यवत्त्विषे त्वंज्योतिस्त्वंद्युतिर्ब्रह्मात्वं
विष्णुस्त्वंप्रजापतिः त्वमेवरुद्रोरुद्रात्मावायुरग्निस्त्ववीर्यवान्
योजनानांसहस्रेद्वेद्वेशतेद्वेचयोजने एकेननिमिषार्धेनक्रममा ॥

नमोस्तुते नवतिर्योजनानां च सहस्राणि च सप्त च यावन्न
घटिकामात्रेनावत्स्खलति भास्करः पुण्यगतस्तु नमस्तुभ्यं एकच
क्रनमोनमः पार्श्वगतस्तु नमस्तुभ्यं नमस्ते चास्तु सर्वगः नमः
स्वातिरूह्यैव सोमसूर्याग्निचक्षुषे नमो वेदान्तवेद्याय सर्वमन्त्र
मयाय च पुरुषो माघमासेन सूर्यो वै फाल्गुनेन तथा चैत्रमासे
तु वेदाङ्गो भानो वैशाखे तापनः स्मृतः उपेन्द्रो ज्येष्ठमासे तु आषाढे
तपते रविः भगास्तु श्रावणे मासि पर्जन्यो भाद्रपदे तथा सुवर्णरेतो
श्विनो मासि कार्त्तिके च दिवाकरः मित्रो मार्गशिरे मासि पौषे
विष्णुः सनातनः इत्येते द्वादशादित्याः काश्यपेयाः प्रकीर्तिताः
उग्ररूपा महात्मानस्तपन्ते विश्वरूपिणः एकादशाया चैव षा

श्री. तथा च सहस्रधा: तथान्तो विश्वरूपेण स्तुमेति संहरति च एष
दे. विष्णुः शिवश्चैव ब्रह्मा चैव प्रजापतिः महेन्द्रश्चैव कालश्च यमो
६ वरुणस्तथैव नक्षत्रग्रहताराणां मध्ये यो विश्वभावनः वायुरग्नि
र्धनाध्यक्षो भूतकर्ता स्वयंविभुः एष देवो हि देवानामसुराणां ध्या
यते जगत् एष कर्ता हि भूतानां संहर्ता रक्षकस्तथा एष लोका
स्त्रिलोकाश्च सप्तद्वीपाः ससागराः एष शैलश्च पातालं दैत्यदा
नवराक्षसाः एष धाता विधाता च बीजं तेजः परा गतिः एष एव
प्रजा नित्यं संवर्धयति रश्मिभिः एष यज्ञः स्वधा स्वाहा ह्रीः श्रीश्च
पुरुषोत्तमः सर्वदेवात्मको देवः सूक्ष्मोऽव्यक्तः सनातनः ईश्व ९
रः सर्वभूतानां परमेष्ठिः प्रजापतिः कालात्मा सर्वभूतात्मा देवा

ष्मा विघ्नेनामवः जन्ममृत्युजराव्याधिः संसारभयनाशनः
दारिद्र्यव्यसनध्वंसी श्रीमान्भान्दिवाकरः गभस्तिहस्तोब्रह्म
एषः सर्वदेवनमस्कृतः आयुरारोग्यमैश्वर्यंनरोविंदतिवेदना
न लोकसाक्षीत्रिलोकेशः कर्ताहर्तातमोश्वरः पवनः पा
वकश्चैवशुचिः सप्ताश्ववाहनः विकर्तनोविवस्वांश्चमार्तंडोभा
स्करोरविः लोकप्रकाशकस्त्विः श्रीमांल्लोकमहेश्वरः इत्येते
र्नामभिः प्रात्तः आदित्यंस्तौतिनित्यशः प्रातरुत्थायकौंतेयतस्य
रोगभयंजनः पातकान्मुच्यतेपापैर्व्याधिभ्योनैवसंशयः ए
कसंध्यंत्रिसंध्यंवासर्वपापैः प्रमुच्यते त्रिसंध्यंजपमानस्तुपश्ये
त्परमंपदं यद्ह्नाकुरुतेपापंतद्ह्नाप्रतिमुंचति यद्रात्र्या

हनेपापंनश्यत्याशुप्रतिगृह्णति दद्रुस्फोटककुष्ठानिमंडला
२ निविषूचिका येचान्येदुष्टरोगाश्चज्वरातीसारकादयः जप
८ मानस्यनश्यंतिजीवेतशरदांशतं संवत्सरेसमरेयदास्यप्रजा
6 नस्यफलंभवेत् अशीर्णांपश्यतिछायामहोरात्रंध्रुवंजय ।
यस्त्विदंपठतेभक्त्यावारेभानोर्महात्मनः प्रातस्नातेकृतेपार्थ
एकाग्रकृन्नमानसः स्वर्णवर्णोभवतिनचांधत्वमाप्नायते
पुत्रवांधनसंपन्नोजायतेनात्रसंशयः यशश्चलभतेनित्यंन
स्वर्गीद्रिवतेते आदित्यहृदयंपुण्यंसूर्यनामविभूषितं श्रु
त्वानमात्रिलंपापं सर्वपापैः प्रमुच्यते अतःपरंनास्तिसिद्धिः
सिद्धिकामस्यपांडव एतज्जपंसकौंतेयः येनश्रेयोह्यवाप्स्य ८

सि आदित्यहृदयं पुण्यं यः पठेत्सुसमाहितः श्रुण्याद्वामुच्यते

पापात्कृतघ्नो गोघ्न एव च यश्च शृणुयान्नित्यं जपेद्वापि समा

हितः सर्वपापविमुक्तात्मा सूर्यलोके महीयते अपुत्रो लभते

पुत्रं जन्मकुजन्मचाप्नुयात् सकुष्ठरोगश्चात्र भक्त्या यः प

ठते सदा यस्त्वादित्यदिने पार्थ नाभिमात्रे जले स्थितः उदयाच

लमारूढं भास्करं प्रणतः स्थितः जपते मानवो भक्त्या शृणुया

द्वा समाहितः स याति परमं स्थानं यत्र देवो दिवाकरः अमित्र

दमनीयोऽयं यदा कर्तुं समारभेत् तदा प्रतिकृतिं कृत्वा शत्रोश्चर

णपांसुना आक्रम्य वामपादेन ह्यादित्यहृदयं जपेत् ॐ ह्रीं माली

स्वाहा ॐ ह्रीं मालीनाय स्वाहा ॐ नालीनाय स्वाहा ॐ त्रिभिश्चरोगी

मा॰ भवति ज्वरी भवति पंचभिः जयेद्युसमन्नभिः पार्थ्ये राक्षसी
नन्द्माविशेन राक्षसीनाभिभूतं न स्यविकारं ऋगणपोऽव गी
१८ यते नृत्यते नवग्रं स्त्रास्फोटयति पावति पिवाकलं च कुमने ह्मस
ते श्रीदत्ते पुनः एवं संपीड्यते पार्थ्य … पिस्यान्महेश्वरः किंप
नमानुषः कश्चिच्छोचाचारविवर्जितः पीडितस्यानसन्देहो ज्व
रो भवति दारुणः यदा मानयहं तस्य कर्तुमिच्छेच्चकुंभकम्
नदा सलिलमादाय जपेन्मंत्रमिमं बुधः ॐ नमो भगवते नभ्य
मादित्याय नमो नमः जयाय जयभद्राय हरिदश्वाय ते नमः
स्नापयेत्तेन मंत्रेण शुभं भवति नान्यथा अत्यथा च न चेद्धि येन
शृणुते नात्र संशयः श्लोकं तेन निखिलं प्रोक्तं एतां चैव निबोध मे प

ह पद्मं लिखेत्पद्मं लिप्ते गोमयमंडले एवं पद्मं लिखेत्सूर्य
मग्रे यांतु रविन्यसेत् याम्यां चैव विवस्वंतं नैर्ऋत्यां तु भगं न्य
सेत् वारुण्यां वारुणां च यीद्वायव्यां मित्रमेव च आदित्यमुत्तरे
पत्रे पेशान्यां विष्णुमेव च मध्ये तु भास्करं विद्यात्सूर्यं पूर्वादिक्र
मेण तु अनुष्ठानं भवत्येवं क्रमेणैव तं समर्चयेत् अतः परं प्रव
क्ष्यामि हृद्धि कामस्य भारत महातेजः समुत्पन्ने शपथेनत्कृतां
जलिः सकेसराणि पद्मानि करवीराणि पांडव तिलतंडुल
संयुक्तः कुशागंधोदकेन च रक्तचंदनमिश्राणि कृत्वा वै ताम्र
भाजने धृत्वा शिरसि तत्पादे जानुभ्यां धरणीं गतः मंत्रमेतेनगुग
कैशाय सर्वोदयाद्भमलये गैंचेविद्याकिल२ काटकेह सर्वार्थसा

प्र० ९

ग्नेयाय स्वाहा ॐ ह्रां ह्रीं ह्रूं नमः सूर्याय नमः स्वाहा ॐ ह्रां ह्रीं
ह्रूं स्वः स्वर्लोकाय सूर्यमूर्तये स्वाहा ॐ ह्रां खं खखोल्काय सूर्य
मूर्तये स्वाहा ॐ ह्रं मार्तण्डाय स्वाहा नमोस्तु सूर्याय नमोस्तु
भानवे नमोस्तु वैश्वानर जातवेदसे त्वमेव चार्घ्यं प्रतिगृह्णा गृह्णा
देवाधिदेवाय नमोस्तुते ॐ नमो भगवते तुभ्यं नमस्ते जातवे
दसे दत्तमर्घ्यं मया भानो त्वं गृहाण नमोस्तुते एहि सूर्य सहस्रां
शो तेजोराशे जगत्पते अनुकंपय मां भक्त्या गृहाणार्घ्यं दिवाक
र ॐ नमो भगवते सूर्याय अमिततेजसे नमः शिवाय नमः आ
दित्याय नमः आदित्यं च शिवं विद्यात् शिवमादित्यरूपिणं उभयो
रंतरं नास्ति यथादित्यस्तथा शिवः एतदिकाम्पहूंकर्त्वं पुरुषो वै

दिवाकरे उदये ब्रह्मा मूर्ध्नि मध्याह्ने तु महेश्वरः अस्तमाने
स्वयं विष्णुस्त्रयीमूर्तिर्दिवाकरः ॐ ह्रां ह्रीं ह्रौं ह्रौं घृणि सू
र्या आदित्याय नमः ॐ नमो भगवते तुभ्यं नमस्ते जातवेदसे
ममार्घ्यं प्रतिगृह्णाण देवदेव नमोस्तुते हिमघ्नाय नमोघ्नाय
रक्षोघ्नाय नमो नमः हरित्तुरगरथं दिवाकरं कनकमयाम्बुज
रेणुपिंजरं प्रतिदिनमुदये नवं नवं शरणमुपैमि हिरण्यरेत
सं पाठकाल भये नैव न व्याधिभ्यो भयं भवेत् न नागेभ्यो भयं चै
व पार्थिवेभ्यस्तथैव च इहेभ्यो न चैव भयं वैव न च भूतग्रहात्कदाचित् उ
गतिं नरने चोरां पुत्रां स्तु लभते पुत्रान् सिद्धिकामो लभेत्सिद्धिं
कन्याकामस्तु कन्यकाम् एतन्पठति कौन्तेय भक्तियुक्तेन चेतसा

आ·
प्र· हृ·
१०॥
१

अश्वमेधसहस्रस्य वाजपेयशतस्य च कन्याकोटिसहस्र
स्य दत्तस्य फलमाप्नुयात् इदमादित्यहृदयं योधीते सततं नरः
सर्वपापविशुद्धात्मा सूर्यलोके महीयते नास्त्यादित्यसमो दे
वो नास्त्यादित्यसमा गतिः प्रत्यक्षो भगवां विष्णुर्येन विश्वं प्रतिष्ठितं
गवां शतसहस्रस्य सम्यग्दत्तेन यत्फलं तत्फलं लभते एतां शा
न्तात्मा स्तौति यो रविं योधीते सूर्यहृदयं सकलं सफलं भवेत् अ
ष्टानां ब्राह्मणानां तु लेखयित्वा समर्पयेत् ब्रह्मलोके ऋषीणां च
जायते मानुषोपि वा अजाय लोकत्रयपावनाय भूतात्मने गोपतये
वृषाय सूर्याय लोकत्रयपावनाय नमो महाकारुणिकोत्तमाय
विवस्वते ज्ञानविदंतरात्मने जगत्प्रदीपाय जगद्धितैषिणे स्वयंभु

वेदीप्रसहस्रचक्षुषेसहस्रेणेन्नमायामिततेजसेनमः नमःस
वित्रेजगदेकचक्षुषेजगत्प्रसूतिस्थितिनाशहेतवे त्रयीम
यायत्रिगुणात्मधारिणेविरिंचिनारायणशंकरात्मने यस्योद
येनेहजगत्प्रबुध्यतेप्रवर्त्ततेचाखिलकर्मसिद्धये ब्रह्मेंद्रना
रायणरुद्रवन्दिताः सनः सदाकरोतुमंगलंरविः नमोस्तुसूर्या
यसहस्ररश्मयेसहस्रशाखान्वितसंभवात्मने सहस्रयोगोद्
भवभावनेसहस्रसंख्यायुगधारिणेनमः यन्मंडलंदी
प्तिकरंविशालंरत्नप्रभंतीव्रमनादिरूपं दारिद्र्यदुःखक्षयकार
णंचपुनातुमांतत्सवितुर्वरेण्यं यन्मंडलंदेवगणैःसुपूजितंवि
प्रैस्तुभावेनविमुक्तिकोविदम् तंदेवदेवंप्रणमामिसूर्यं पुनातु

मा॰ मांतत्सवितुर्वरेण्यम् यन्मंडलंसूक्ष्ममति:प्रबोधंधर्मस्य
सू॰ २ वृद्धिंकुरुतेजनस्य यत्सर्वपापक्षयकारणंच पुनातुमांत
११ त्सवितुर्वरेण्यम् यन्मंडलंव्याधिविनाशदक्षंयदृग्यजु:
10 सामसुसुप्रसिद्धम् प्रपूर्यतेयेनचभूर्भुव:स्व: पुनातुमां
तत्सवितुर्वरेण्यम् यन्मंडलंवेदविदोवदंति ह्यमर्त्यमर्त्या:
सुरासिद्धयक्षा: यद्योगिनोयोगरतस्यसिद्धा: पुनातुमां
तत्सवितुर्वरेण्यम् यन्मंडलंसर्वजनेषुपूजितंज्योतिश्च
कुर्यादिहमर्त्यलोके यत्कालकल्पादिमनादिरूपंपुनातु
मांतत्सवितुर्वरेण्यम् यन्मंडलंविष्णुचतुर्मुखाख्यंयद १०
क्षरंपापहरंजनानाम् यत्कालकल्पक्षयकारणंचपुनातु

रसिंहासनसन्निविष्टः केयूरवान्कनककुंडलवान्कि
रीटीहारीहिरण्मयवपुर्धृतशंखचक्रः । सर्पोखेचक्रं र
विमंडलेस्थितं अशेषयाक्रांतमनेनमुद्घनमु भजामि त्र्य
ध्ववनपनीयचूर्णिणं सर्वेत्तमांचित्रविभूषणोज्वलां ॥
इति श्रीकृष्णार्जुनसंवादे आदित्यहृदयस्तोत्रं संपूर्णम् ॥
इमं देवा इति मंत्रेणाश्वत्थादि सर्वकेलक्षपारिमितजपो विधेयः मंत्रः
इमं देवा असपत्नं सुवध्वं महते क्षत्राय महते ज्यैष्ठ्याय महते जानर
राज्यायेंद्रस्येंद्रियाय इमममुष्य पुत्रममुष्यै पुत्रमस्यै विश एष वोमी रा
जा सोमोस्माकं ब्राह्मणानां राजा पलाशसमिज्जुहुयात् त्रयदा
नेन्महतरते सर्कोसपात्रस्थितततुलोष्ट्रकर्षं रुक्मापलशंख
वरत्न भगोपशुकेतद्यमेवैरोप्यवेद्वायदद्यात् हुतशेषपात्रम

ग्रं॰ १२

अथ स्नानेरत्नमालायां पंचगव्यगजदानविमिश्रैः शंखशुक्तिकु
शुद्धस्फाटिकैश्च शीतरश्मिकृतवैकृतिहंतृ स्नानमेतदुदितं नृपती
नाम् रजतेशुमुक्ताफलेवाथ्यायम् तंडुलकपैरवस्त्रहृत एणपात्रा
णि सामान्यजनोपयोगिदानानि शंभुहोराप्रकाशेस्मिन्ग्रहल्लीयोगः स
वितृदशायामंतरालेयदि निशेशः स्यात्तदाग्रहल्लीरोगः चे समरो
जिनीशस्यदशांतरालेनक्षत्रनाथः कृतस्तेनराणाम् प्रमादमङ्गो
ग्रहणीचपांडुस्तथैयदाकण्ठकालाटशाच स्तन्यंचंद्रजनितं कृतंश वै
ममायशांतिः सर्वकामिमंदेवेति आकृष्णेमंत्रेण